उपशास्त्री – द्वितीय खण्ड साहित्य तृतीय पत्रम

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

प्र० (1) विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः ॥

उत्तरम् – प्रसङ्गः – प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति – पुरा राजसूयकाले यः सम अनुत्तर कुरुदेशान् विनिर्जित्य हिरण्यरत्नादि-मयं प्रचुरं द्रव्यमादाय तुभ्य ददौ, स एवार्जुनः संप्रति वस्त्रादिनिर्माणाय वल्कान्याहराय प्रयच्छति । एतादृक्पराक्रमशालिन ईदृशीमवस्थाम-वलोक्यापि तव मन्युर्नोद्दीप्तो भवतीति महदाश्चर्यम् ।

व्याख्या – वासवः = इन्द्रः, उपमा = उपमानं यस्य स वासवोपमः = इन्द्र-तुल्यः, यः = धनञ्जयः, उत्तरान् कुरून् = मेरोरुत्तरान् मानषान् देशविशेषान् । विजित्य (= जित्वा) । प्राज्यं = प्रभूतं । 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः । कुप्यादन्यद् अकुप्यम् = हेमरूप्यात्मकं । 'स्यात्कोषश्च हिरण्यश्च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कु-प्यम्' इत्यमरः । वसु = धनम् अयच्छत् = दत्तवान् । 'पाघ्रा-' इत्यादिना दाणो यच्छादेशः । स धनं जयतीति धनञ्जयः = अर्जुनः संज्ञायां भृतॄवृजि – इत्यादिना खच प्रत्ययः । अरुर्द्विषत् – इत्यादिना मुमागमः । अधुना = अस्मिन् काले । 'अधुना' इति निपातनात् साधुः । तव [वल्कान्येव वासांसि] वल्कवासांसि [= वृक्षत्वग्-रूपाणि वस्त्राणि] आहरन् [= आनयन्] कथं मन्युं = क्रोधं दुःखं वा न करोति ।

Renu Devi
30/10/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

शास्त्री - II खण्ड साहित्य

रघुवंशमहाकाव्यम् - त्रयोदशः सर्गः

प्र० (1) – वेलानिलः केतकरेणुभिस्ते सम्भावयत्याननमायताक्षि ! ।
मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥

उत्तरम् :– प्रसंगः प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश-महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके श्रीरामः सीतां प्रति मार्गदर्शनं करोति अयि सुलोचने सीते! सागरतीर वायु बिम्बफलसदृशं त्वन्मुखाम्भोजं पातुकामिनया आभरण क्रियायां विलम्बमसहमानं मां ज्ञात्वा केतकीपुष्प-पराग विलेपनेन त्वन्मुखकमलङ्करोतीति भावः।

व्याख्या:– हे आयताक्षि ! = विशाललोचने! वेलानिलः = सागरतटवायुः। केतक-रेणुभिः = केतकीपुष्पपरागैः। ते = तव। आननम् = मुखम्। सम्भावयति = अलङ्करोति। बिम्बाधरबद्धतृष्णम् = बिम्बोष्ठपानलालसम्। माम् = रामम्। मण्डनकालहानेः = अलंकरणसमयकालक्षेपस्य। अक्षमम् = असहमानम्। कालक्षेपमसहमानम्। वेत्ति इव = जानाति इव।

Renu Devi
30/10/20

राधा उमाकान्त सं० महावि० सुरखसेना, पूर्णिया।

उपशास्त्री - I खण्ड साहित्य तृतीय पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमः सर्गः

प्र०-(1)- स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥

उत्तरम् -प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय-महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति - संप्रति अप्रतिहताज्ञेन तेन युवराजकर्मणि नूतनयौवनोद्भेद-प्रगल्भः स्वानुजो दुःशासनो नियोजितः स्वयं च पुरोहितानुज्ञया निरन्तरं यज्ञादिषु हवनेन देवान् तर्पयति ।

पदार्थ - इद्धशासनः = प्रसिद्ध (अप्रतिहत) है शासन जिसका (ऐसा), सः = वह (दुर्योधन) । नवयौवनोद्धतं = नई जवानी में मदोन्मत्त । दुःशासनं = (अपने भाई) दुःशासन को । यौवराज्ये = युवराज-कर्म में निधाय = नियुक्त करके । पुरोधसा = पुरोहित से । अनुमतः = आज्ञा पाकर । अखिन्नः = न थकता हुआ (निरन्तर) । मखेषु = यज्ञों में । हव्येन = हवनीय द्रव्यों से । हिरण्य-रेतसं = अग्नि को । धिनोति = प्रसन्न कर रहा है ।

Renu Devi
30/10/20

राधा उमाकान्त सं० महाविद्या० सुखसेना,
पूर्णिया ।